ZERO TO PLUS

- वायुमण्डलं भृशं दूषितं न हि निर्मलं जलम्।
- कुत्सितवस्तुमिश्रितं भक्ष्यं समलं धरातलम्।।
- करणीयं बहिरन्तर्जगति तु बहु शुद्धिकरणम्। शुचि... ।।3।।

- अन्वय:- हि भृशं दूषितं वायुमण्डलं निर्मलं जलम् न, कुत्सितवस्तुमिश्रितं भक्ष्यं, समलं धरातलम् बहि: करणीयं अंत: जगति तु बहु शुद्धिकरणम् ।
- अर्थ – निश्चय ही अत्यधिक दूषित वायुमंडल (है), निर्मल जल (भी) नहीं है । कुत्सित (रासायनिक इत्यादि) वस्तुओं से मिले हुए खाने के पदार्थ (हैं), गंदगी से भरी धरती हो साफ़ सुथरा करना चाहिए, संसार में अन्दर अधिक शुद्धि करनी चाहिए ।

Scanned by TapScanner

दिनांक - 15 अप्रैल 2021 अभ्यास कार्य

कक्षा 8

प्रश्न -1- वाक्यो में सही क्रिया लगाकर शुद्ध करे ।

सा गच्छन्ति ।

युवां चलसि ।

छात्राः पठिष्यति ।

तौ कुर्दन्ति ।

ते पुस्तकं पठसि ।

चटका कूजन्ति ।

त्वं क्रीडन्ति ।

अहं स्वयं स्वकार्यं करिष्यति ।।

2021/4/15 10:23

प्रश्न -2 खाली स्थान मे क्रिया पद लिखे ।

Scanned by TapScanner

दिनांक - 15 अप्रैल 2021

## अभ्यास कार्य

कक्षा 8

प्रश्न -1- वाक्यो में सही क्रिया लगाकर शुद्ध करे।

सा गच्छन्ति।

युवां चलसि।

छात्रा: पठिष्यति।

तौ कुर्दन्ति।

ते पुस्तकं पठसि।

चटका कूजन्ति।

त्वं क्रीडन्ति।

अहं स्वयं स्वकार्यं करिष्यति॥

2021/4/15 10:23

प्रश्न -2 खाली स्थान मे क्रिया पद लिखे।

Scanned by TapScanner

निजबुद्ध्या विमुक्ता सा भयाद् व्याघ्रस्य भामिनी।
अन्योऽपि बुद्धिमाँल्लोके मुच्यते महतो भयात्।।

भयाकुलं व्याघ्रं दृष्ट्वा कश्चित् धूर्तः शृगालः हसन्नाह– "भवान् कुतः भयात् पलायितः?"

व्याघ्रः:- गच्छ, गच्छ जम्बुक! त्वमपि किञ्चिद् गूढप्रदेशम्। यतो व्याघ्रमारीति या शास्त्रे श्रूयते तयाहं हन्तुमारब्धः परं गृहीतकरजीवितो नष्टः शीघ्रं तदग्रतः।

शृगालः:- व्याघ्र! त्वया महत्कौतुकम् आवेदितं यन्मानुषादपि बिभेषि?

व्याघ्रः:- प्रत्यक्षमेव मया सात्मपुत्रावेकैकशो मामत्तुं कलहायमानौ चपेटया प्रहरन्ती दृष्टा।

जम्बुकः:- स्वामिन्! यत्रास्ते सा धूर्ता तत्र गम्यताम्। व्याघ्र! तव पुनः तत्र गतस्य सा सम्मुखमपीक्षते यदि, तर्हि त्वया अहं हन्तव्यः इति।

व्याघ्रः:- शृगाल! यदि त्वं मां मुक्त्वा यासि तदा वेलाप्यवेला स्यात्।

जम्बुकः:- यदि एवं तर्हि मां निजगले बद्ध्वा चल सत्वरम्। स व्याघ्रः तथा कृत्वा काननं ययौ। शृगालेन सहितं पुनरायान्तं व्याघ्रं दूरात् दृष्ट्वा बुद्धिमती



चिन्तितवती-जम्बुककृतोत्साहाद् व्याघ्रात् कथं मुच्यताम्? परं प्रत्युत्पन्नमतिः सा जम्बुकमाक्षिपन्त्यङ्गुल्या तर्जयन्त्युवाच–

रे रे धूर्त त्वया दत्तं मह्यं व्याघ्रत्रयं पुरा।
विश्वास्याद्यैकमानीय कथं यासि वदाधुना।।



Scanned by TapScanner

द्वितीयः पाठः

# बुद्धिर्बलवती सदा

प्रस्तुतोऽयं पाठः "**शुकसप्ततिः**" कथाग्रन्थस्य सम्पादनं कृत्वा संगृहीतोऽस्ति। अत्र पाठांशे स्वलघुपुत्राभ्यां सह काननमार्गेण पितृगृहं प्रति गच्छन्त्याः बुद्धिमतीति नाम्न्याः महिलायाः मतिकौशलं प्रदर्शितं वर्तते। या पुरतः समागतं सिंहमपि भीतिमुत्पाद्य ततः निवारयति। इयं कथा नीतिनिपुणयोः शुकसारिकयोः कथामाध्यमेन सद्वृत्तेः विकासार्थं प्रेरयति।

**अस्ति देउलाख्यो ग्रामः। तत्र राजसिंहः नाम राजपुत्रः वसति स्म। एकदा केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता। मार्गे गहनकानने सा एकं व्याघ्रं ददर्श। सा व्याघ्रमागच्छन्तं दृष्ट्वा धाष्ट्र्यात् पुत्रौ चपेटया प्रहृत्य जगाद–"कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथः? अयमेकस्तावद्विभज्य भुज्यताम्। पश्चाद् अन्यो द्वितीयः कश्चिल्लक्ष्यते।"**



**इति श्रुत्वा व्याघ्रमारी काचिदियमिति मत्वा व्याघ्रो भयाकुलचित्तो नष्टः।**



Scanned by TapScanner